त्वरिः, स्त्री, (त्वरणमिति । त्वर+भावे इन् ।) त्वरा । इति हेमचन्द्रः । २ । २३६ ॥

त्वरितं, क्ली, (त्वर+क्तः ।) शीघ्रम् । (त्वरते स्मेति । त्वर+गत्यार्थाकर्म्मकेति कर्त्तरि क्तः । यद्वा, त्वरा सञ्जातास्य । त्वरा+तारकादित्वात् इतच् ।) तद्विशिष्टे, त्रि । इत्यमरः ।१।१।६८॥ (यथा, पञ्चतन्त्रे । ३ । १०२ ।
"बह्वन्तराययुक्तस्य धर्म्मस्य त्वरिता गतिः ॥")

त्वरितोदितं, त्रि, (त्वरितं शीघ्रं यथा तथा उदितं कथितम् ।) शीघ्रोच्चारितवचः । तत्पर्य्यायः । निरस्तम् २ । इत्यमरः । १ । ६ । २० ॥

त्वष्टः, त्रि, (त्वक्ष्यते तनूक्रियते स्मेति । त्वक्ष तनूकरणे+क्तः ।) तनूकृतः । चाँचा छोला इत्यादि भाषा । तत्पर्य्यायः । तष्टः २ । इत्यमरः । ३ । ११ । ६६ ॥

त्वष्टा, [ऋ] पुं, (त्वेषति दीप्यतीति । त्विष दीप्तौ+"नप्तृनेष्टृत्वष्टृहोत्रिति ।" उणां ।२।६६। इति तृच् इतोऽत्वञ्च ।) आदित्यविशेषः । (यथा, महाभारते । १ । ६५ । १४-१५ ।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः ।
ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत ! ॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ।
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ॥"
एते तु चाक्षुषस्य मनोरन्तरे तुषिता नाम देवा आसन् वैवस्वतेऽन्तरे तु द्वादश आदित्याः । इति विष्णुपुराणे । १ । १५ । १३१—१३३ ॥ तथा मात्स्ये च । ६ । ३—५ ॥ त्वक्षति तनूकरोति काष्ठादिकं शिल्पकार्य्यत्वात् । त्वक्ष+तृच् ।) विश्वकर्म्मा । इति हेमचन्द्रः ।३।५८१॥ (यथा, माघे । ३ । ३५ ।
"त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसवस्य सीमा ॥"
अयन्तु माघमासे सूर्य्यरथपरिभ्रमणाधिकारिणामन्यतमः । यथा, विष्णुपुराणे । २ । १० । १५ ।
"त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रोऽथ सप्तमः ।
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ॥"
विश्वकर्म्मणः पुत्त्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।
"तस्य पुत्त्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥"
प्रजापतिविशेषः । यथा, महाभारते ।५।६।३।
"त्वष्टा प्रजापतिर्ह्यासीत् देवश्रेष्ठो महातपाः ।
स पुत्त्रं वै त्रिशिरसमिन्द्रद्रोहात् किलासृजत् ॥"
महादेवः । यथा, महाभारते । १३।१७।१०३ ।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
वर्णसङ्करजातिविशेषः । इत्यमरः । २ ।१०।६ ॥ अस्य पर्य्यायः । काष्ठतट्शब्दे तत्पर्य्यायाः कथिताः । (इन्द्रः । इति ऋग्वेदभाष्ये सायनः । १ । ११७ । २८ ॥ असुरभेदः । इति तत्रैव सायनः । ३ । ४८ । ४ ॥

त्वाचप्रत्यक्षं, क्ली, (त्वाचं त्वच्-सम्बन्धि प्रत्यक्षम् ।) स्पर्शज्ञानम् । त्वगादेः स्पर्शद्वारा बोधः । यथा, "अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात् ।" इति सिद्धान्तमुक्तावली ॥

त्वाष्टी, स्त्री, दुर्गा । यथा,—
"तुष तुष्टौ स्मृतो धातुस्तस्य तुष्टी निपातने ।
स्वजन्येषा प्रजास्तुष्टी त्वाष्टी तेन प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

त्वाष्ट्रः, पुं, (त्वष्टुरपत्यं पुमान् । अण् ।) वृत्रासुरः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । ५ । ४ ।
"उद्यमेन हतस्त्वाष्ट्रो नमुचिर्बल एव च ॥"
विश्वरूपः । यथा, भागवते । ६ । ८ । ३ ।
"वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ॥"
त्वष्टृसम्बन्धिनि, त्रि । यथा, मार्कण्डेये ।२१।८५।
"ततोऽश्वं त्वाष्ट्रमादाय चिक्षेप प्रति दानवान् ॥"
तथा, भागवते । ६ । १४ । २७ ।
"श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥"
त्वष्टा अधिष्ठात्री देवतास्येति अण् । चित्रानक्षत्रम् । यथा, बृहत्संहितायाम् । ७ । ११ ।
"घोरा श्रवणस्त्वाष्ट्रं वसुदेवं वारुणञ्चैव ॥")

त्वाष्ट्री, स्त्री, (त्वष्टा अधिष्ठात्री देवतास्याः । त्वष्टृ+अण्+ङीप् ।) चित्रानक्षत्रम् । इति हेमचन्द्रः ॥ (त्वष्टुर्विश्वकर्म्मणोऽपत्यं स्त्री ।) संज्ञानामसूर्य्यपत्नी । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ६६ । ३५ ।
"त्वाष्ट्री तु सवितुर्भार्य्या वड़वा रूपधारिणी ।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ ॥")
रथिका । क्षुद्ररथः । इति त्रिकाण्डशेषः ॥

त्विट्, [ष्] स्त्री, (त्विष दीप्तौ+सम्पदादित्वात् क्विप् ।) शोभा । (यथा, महाभारते । ३ । २० । २ ।
"कृपश्चं द्वारकाशाङ्कं महाराज ! हतत्विषम् ॥")
प्रभा । (यथा, माघे । १ । ३ ।
"चयस्त्विषामित्यवधारितं पुरः
सतः शरीरीति विभाविताकृतिम् ॥")
वाक् । इति मेदिनी । षे, १३ ॥ व्यवसायः । जिगीषा । इति विश्वः ॥ (दीप्यमाने, त्रि । यथा, ऋग्वेदे । ४ । १७ । २ ।
"तव त्विषो जनिमन् रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य मन्योः ॥"
"हे इन्द्र त्विषो दीप्यमानस्य तव त्वदीये जनिमन् जन्मनि सति ।" इति तद्भाष्ये सायनः ॥)

त्विष, ओ ञ भासे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-दाने-सकं-अन्यत्र अकं-अनिट् ।) ओ, अत्विक्षत् । ञ, त्वेषति त्वेषते । भासो दीप्तिः । अदान्निवासे दाने च त्विषी ञ अनुवर्त्तते । ओ, अवात्विक्षत् । ञ, अवत्वेषति अवत्वेषते । जनो निवसति ददाति दीप्यते वा इत्यर्थः । इति दुर्गादासः ॥

त्विषा, स्त्री, (त्विष्+हलन्तात् वा टाप् ।) दीप्तिः । इति शब्दरत्नावली ॥

त्विषाम्पतिः, पुं, (त्विषां प्रभाणां पतिः । षष्ठ्या अलुक् ।) सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥

त्विषिः, स्त्री, (त्विष दीप्तौ+"इगुपधात् कित् ।" उणां ४ । ११६ । इति इन् स च कित् ।) किरणम् । इति हेमचन्द्रः । २ । १४ ॥ (यथा, ऋग्वेदे । ६ । ७१ । ६ ।
"उच्चेव सूया परियन्नरावीदधि
त्विषीरधित सूर्य्यस्य ॥")

त्सर, छद्मगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकं च-सेट् ।) दन्त्यवर्गाद्यस्याधो-दन्त्यसकारः । त्सरति धूर्त्तः छलेन गच्छतीत्यर्थः । इति दुर्गादासः ॥ (यथा, अथर्ववेदे । ८ । ६ । ८ ।
"यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति
जाग्रतीम् ॥")

त्सरुः, पुं, (त्सरति कौटिल्यं गच्छतीति । त्सर + "भृमृशीतृचरित्सरीति ।" उणां १ । ७ । इति उः ।) खड्गमुष्टिः । इत्यमरः । २ । ८ । ९० ॥ तत्पर्य्यायः । मुष्टिः २ तालतलः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २४३ ।
"ज्योत्स्नाभिसारसञ्चितवेशे ! व्याकोषमल्लिकोत्तंसे ! ।
विशसि मनो निशितेव स्मरस्य कुसुमत्सरुच्छुरिका ॥"
सर्पः । यथा, ऋग्वेदे । ५ । ५० । १ ।
"मा मां पद्येन रपसा विदत्त्सरुः ।"
"तथा त्सरुश्छद्मगामी जिह्मगः सर्प इत्यर्थः मां पद्येन पादभवेन रपसा । रपि शब्दकर्म्मा । शब्देन मा विदत् मा जानातु ।" इति तद्भाष्ये सायनः ॥)

थ

थ, थकारः । स व्यञ्जनसप्तदशवर्णः । तवर्गद्वितीयवर्णश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १७ ।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥")
अस्य स्वरूपं यथा,—
"थकारं चञ्चलापाङ्गि ! कुण्डली मोक्षरूपिणी ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
अरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"
इति कामधेनुतन्त्रम् ॥
(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,—
"कुञ्चिता कुण्डला भूत्वा वामाद्दक्षिणतस्ततः ।
वामतः कुञ्चिता भूत्वा दक्षाधोदक्षतो गता ॥
ऊर्द्ध्वे ऋज्वायता रेखा सुरा गङ्गादयः क्रमात् ।
वाणी भवानी लक्ष्मीश्च ध्यानमस्य प्रचक्षते ॥"